त्रयोदशी च शेषास्तु प्रशस्ता दशरात्रयः ॥
युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु ।
तस्मात् युग्मासु पुत्रार्थी संविशेदार्त्तवे स्त्रियम् ॥
पुमान् पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः ।
समेऽपुमान् पुंस्त्रियौ वा क्षीणेऽल्पे च विपर्य्ययः" ॥
"रजः सप्तदिनं यावत् ऋतुश्च भिषजां वर" ! ।
इति शारीरस्थाने प्रथमेऽध्याये हारीतेनोक्तम् ॥
"ऋतुस्तु द्वादशरात्रं भवति दृष्टार्त्तवम् ॥"
"नियतं दिवसेऽतीते सङ्कुचत्यम्बुजं यथा ।
ऋतौ व्यतीते नार्य्यास्तु योनिः संव्रियते तथा ॥
मासेनोपचितं काले धमनीभ्यान्तदार्त्तवम् ।
ईषत्कृष्णं विगन्धञ्च वायुर्योनिमुखं नयेत् ॥
तद्वर्षाद्द्वादशात्काले वर्त्तमानमसृक् पुनः ।
जरापक्वशरीराणां याति पञ्चाशतः क्षयम्" ॥
इति शारीरस्थाने तृतीयेऽध्याये सुश्रुतेनोक्तम् ॥
"द्वादशाद्वत्सरादूर्द्ध्वमापञ्चाशत् समाः स्त्रियः ।
मासि मासि भगद्वारा प्रकृत्यैवार्त्तवं स्रवेत् ॥
आर्त्तवस्रावदिवसात् ऋतुः षोडशरात्रयः ।
गर्भग्रहणयोग्यस्तु स एव समयः स्मृतः" ॥
"सर्व्वासामेव चतुर्व्वर्णस्त्रीणां सर्व्ववादिसम्मतः ।
पूर्व्वोक्तसमयः ग्रन्थान्तरेषु विषयः । तद्यथा ।
स्नानदिवसादूर्द्ध्वं द्वादशरात्रावधि ब्राह्मण्याः । दश-
रात्रावधि क्षत्त्रियायाः । अष्टरात्रावधि वैश्यायाः ।
षड्रात्रावधि शूद्रायाः गर्भधारणे शक्तिः" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
"पद्मं सङ्कोचमायाति दिनेऽतीते यथा तथा ।
ऋतावतीते योनिः सा शुक्रं नातः प्रतीच्छति ॥
मासेनोपचितं रक्तं धमनीभ्यामृतौ पुनः ।
ईषत्कृष्णं विगन्धञ्च वायुर्योनिमुखान्नुदेत्" ॥
"ऋतुस्तु द्वादशनिशाः पूर्व्वास्तिस्रश्च निन्दिताः" ॥
इति शारीरस्थाने प्रथमेऽध्याये वाभटेनोक्तम् ॥
शिवः । यथा महाभारते १३ । महादेवसहस्र-
नामकथने १७ । १२९ ।
"ऋतुः संवत्सरो मासः पक्षः संख्यासमापनः" ॥
विष्णुः । यथा, महाभारते १३ । विष्णुसहस्रनाम-
कथने १४९ । ५८ ।
"ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः" ॥)
दीप्तिः । इति मेदिनी । मासः । सुवीरः । इति विश्वः ॥

ऋतुप्राप्तः, त्रि, (ऋतुः प्राप्तोऽनेन ।) फलेग्रहिः ।
पनसवटादिः । इति शब्दचन्द्रिका ।

ऋतुमती, स्त्री, (ऋतुरस्या अस्तीति । ऋतु + मतुप्
+ ङीप् ।) ऋतुयुक्ता स्त्री । तत्पर्य्यायः । रज-
स्वला २ स्त्रीधर्म्मिणी ३ अवी ४ आत्रेयी ५
मलिनी ६ पुष्पवती ७ उदक्या ८ । इत्यमरः ।
(यथा, महाभारते । १ । ३ । ८७ । "उपाध्यायानी
ते ऋतुमती उपाध्यायश्च प्रोषितोऽस्या यथाय-
मृतुर्वन्ध्यो न भवति तथा क्रियताम्" ॥
ऋतुमतीकृत्यमाह ।
"आर्त्तवस्रावदिवसात् अहं सा ब्रह्मचारिणी ।
शयीत दर्भशय्यायां पश्येदपि पतिं न च ॥
करे शरावे पर्णे वा हविष्यं त्र्यहमाचरेत् ।
अश्रुपातं नखच्छेदमभ्यङ्गमनुलेपनम् ।
नेत्रयोरञ्जनं स्नानं दिवास्वप्नं प्रधावनम् ।
अत्युच्चशब्दश्रवणं हसनं बहुभाषणम् ॥
आयासं भूमिखननं प्रवातञ्च विवर्जयेत् ।
ततश्चतुर्थे दिवसे स्नाता सद्वसनादिभिः ।
भूषिताः सुमनाः पश्येत् भर्त्तारं समलङ्कृतम् ॥
पूर्व्वं पश्येत् ऋतुस्नाता यादृशं नरमङ्गना ।
तादृशं जनयेत् पुत्त्रं ततः पश्येत् पतिं प्रियम्" ॥
एतदकरणे प्रत्यवायमाह ।
"अज्ञानात् वा प्रमोदाद्वा लौल्याद्वा दैवतश्च वा ।
सा चेत् कुर्य्यात् निषिद्धानि गर्भदोषांस्तदाप्नुयात् ॥
एतस्या रोदनात् गर्भो भवेद्विकृतलोचनः ।
नखच्छेदेन कुनखी कुष्ठी त्वभ्यङ्गतो भवेत् ॥
अनुलेपात् तथा स्नानात् दुःखशीलोऽञ्जनादृदृक् ।
स्वापशीलो दिवास्वापात् चञ्चलः स्यात् प्रधावनात् ॥
अत्युच्चशब्दश्रवणात् वधीरः खलु जायते ।
तालुदन्तौष्ठजिह्वासु श्यावो हसनतो भवेत् ॥
प्रलापी भूरिकथनात् उन्मत्तस्तु परिश्रमात् ।
खलतिर्भूमिखननात् उन्मत्तो वातसेवनात्" ॥
इति ।
"क्षामप्रसन्नवदनां स्फुरच्छ्रोणिपयोधराम् ।
स्रस्ताक्षिकुक्षिं पुंस्कामां विद्यादृतुमतीं स्त्रियम्" ॥
इति शारीरस्थाने प्रथमेऽध्याये वाभटेनोक्तम् ॥
"गते पुराणे रजसि नवे चावस्थिते पुनः शुद्ध-
स्नातां स्त्रियमव्यापन्नयोनिशोणितगर्भाशयामृतु-
मतीमाचक्ष्महे" ।
इति शारीरस्थाने चतुर्थेऽध्याये चरकेणोक्तम् ॥
"पीनप्रसन्नवदनां प्रक्लिन्नात्ममुखद्विजाम् ।
नरकामां प्रियकथां स्रस्तकुक्ष्यक्षिमूर्द्धजाम् ॥
स्फुरद्भुजकुचश्रोणिनाभ्यूरुजघनस्फिचम् ।
हर्षौत्सुक्यपराञ्चापि विद्यादृतुमतीमिति" ॥
इति शारीरस्थाने तृतीयेऽध्याये,—
"ततः शुद्धस्नातां चतुर्थेऽहन्यहतवासःसमलङ्कृतां
कृतमङ्गलस्वस्तिवाचनां भर्त्तारं दर्शयेत् । तत्-
कस्य हेतोः ।
पूर्व्वं पश्येदृतुस्नाता यादृशं नरमङ्गना ।
तादृशं जनयेत् पुत्त्रं भर्त्तारं दर्शयेदतः ॥
ततो विधानं पुत्त्रीयमुपाध्यायः समाचरेत् ।
कर्म्मान्ते च क्रमं ह्येनमारभेत विचक्षणः" ॥
"तत्र प्रथमे दिवसे ऋतुमत्यां मैथुनगमनमना-
युष्यं पुंसां भवति । यश्च तत्राधीयते गर्भः स
प्रसवमानो विमुच्यते । द्वितीयेऽप्येवं सूतिकागृहे
वा । तृतीयेऽप्येवमसम्पूर्णाङ्गोऽल्पायुर्व्वा भवति ।
चतुर्थे तु सम्पूर्णाङ्गो दीर्घायुश्च भवति । नच
प्रवर्त्तमाने रक्ते वीजं प्रविष्टं गुणकरं भवति यथा
नद्यां प्रतिस्रोतः प्लावि द्रव्यं प्रक्षिप्तं प्रतिनिव-
र्त्तते नोर्द्ध्वं गच्छति तद्वदेव द्रष्टव्यम् । तस्मान्नि-
यमवतीं त्रिरात्रं परिहरेत् । अतः परं मासा-
दुपेयात्" । इति च शारीरस्थाने द्वितीयेऽध्याये
सुश्रुतेनोक्तम् ॥)

ऋतुराजः, पुं, (ऋतूनां राजा । "राजाहःसखिभ्य-
ष्टच्" । ५ । ४ । ९१ । इति टच् ।) वसन्तकालः ।
इति राजनिर्घण्टः ।

ऋतुवृत्तिः, पुं, (ऋतुषु वृत्तिर्वर्त्तनं यस्य ।) वत्सरः ।
इति त्रिकाण्डशेषः ॥

ऋतुसन्धिः, पुं, (ऋत्वोः सन्धिर्मेलनम् ।) ऋतुद्वयसन्धि-
कालः । स च ऋत्वोरन्त्यादिसप्ताहौ । तथाच
वाभटः ।
"ऋत्वोरन्त्यादिसप्ताहावृतुसन्धिरिति स्मृतः ।
तत्र पूर्व्वो विधिस्त्याज्यः सेवनीयः परो विधिः" ॥

ऋतुस्नानं, क्ली, (ऋतौ स्नानम् ।) रजस्वलास्त्रियाः
चतुर्थाहकर्त्तव्यस्नानम् । इति स्मृतिः ॥ तत्स्ना-
नानन्तरं भर्तृवदनं द्रष्टव्यं नान्यस्य भर्त्रसन्निधाने
भर्त्तारं मनसि ध्यात्वा सूर्य्यं विलोकयेत् । इति
काशीखण्डम् ॥
("ततः पुष्पेक्षणादेव कल्याणध्यायिनी त्र्यहम् ।
मृजालङ्काररहिता दर्भसंस्तरशायिनी ॥
क्षैरेयं यावकं स्तोकं कोष्ठशोधनकर्षणम् ।
पर्णे शरावे हस्ते वा भुञ्जीत ब्रह्मचारिणी ॥
चतुर्थेऽह्नि ततः स्नात्वा शुक्लमाल्याम्बरा शुचिः ।
इच्छन्ती भर्तृसदृशं पुत्त्रं पश्येत् पुरः पतिम्" ॥
इति शारीरस्थाने प्रथमेऽध्याये वाभटेनोक्तम् ॥)

ऋते, व्य, (ऋत + के ।) विना । वर्ज्जनम् । इत्यमरः ॥
("अवेहि मां प्रीतमृते तुरङ्गमात्" ।
इति रघुवंशे । ३ । ६३ । तथा, कुमारे २ । ५७ ।
"अंशादृते निषिक्तस्य नीललोहितरेतसः" ॥)

ऋत्विक्, [ज्] पुं, (ऋतौ यजतीति । ऋतु + यज् +
ऋत्विगादिना क्विन्नन्तो निपातितः ।) पुरोहितः ।
यथा,—
"अग्न्याधेयं पाकयज्ञानग्निष्टोमादिकान्मखान् ।
यः करोति वृतो यस्य स तस्यर्त्विगिहोच्यते" ॥
इति मानवे २ । १४३ ॥ तत्पर्य्यायः । याजकः २ ।
इत्यमरः ॥ भरताः ३ कुरवः ४ वाग्यतः ५ वृक्त-
वर्हिषः ६ यतस्रुचः ७ मरुतः ८ सबाधः ९ देव-
यवः १० । इत्यष्टावृत्विङ्नामानि । इति वेदनि-
र्घण्टौ ३ अध्यायः ॥
अयं हि नायकस्य धर्म्मसहायः । यदुक्तं साहि-
त्यदर्पणे । ३ । ५१ । "ऋत्विक्पुरोधसः स्युर्ब्रह्म-
विदस्तापसास्तथा धर्म्मे" ॥)

ऋद्धं, क्ली, (ऋध् + क्त ।) सम्पन्नधान्यम् । इति मे-
दिनी ॥ परिपक्वमर्द्दितधान्यम् । इत्यमरटीकायां
भरतः ॥ बहुलितधान्यम् । इति सुभूतिः ॥ तत्प-
र्य्यायः । आवसितम् २ । इत्यमरः ॥ अवसितम् ३ ।
इति तट्टीका । सिद्धान्तः । इति हेमचन्द्रः ॥
(पुं, विष्णुः । यथा, महाभारते विष्णुसहस्रनाम-
कीर्त्तने १३ । १४९ । ४३ ।
"ऋद्धः स्पष्टाक्षरो मन्त्रश्चन्द्रांशुर्भास्करद्युतिः" ॥)

ऋद्धः, त्रि, (ऋध् + क्त ।) समृद्धः । सम्पन्नः । इति
मेदिनीकरहेमचन्द्रौ ॥ (यथा, गीतायाम् । २ । ८ ।
"अवाप्य भूमावसपत्नमृद्धं
राज्यं सुराणामपि चाधिपत्यम्" ॥)

ऋद्धिः, स्त्री, (ऋध् + क्तिन् ।) अष्टवर्गान्तर्गतौषध-
विशेषः तत्पर्य्यायः । योग्यम् २ सिद्धिः ३ लक्ष्मीः
४ । इत्यमरः ॥ प्राणपदा ५ श्रव्या ६ । इति रत्न-
माला । प्राणदा ७ जीवदात्री ८ सिद्धा ९ योग्या